# Vishvanathashtakastotram

# વિશ્વનાથાષ્ટકસ્તોત્રમ્

## Document Information

Text title : vishvanAthAShTakastotram

File name : vishvanAthAShTakastotram.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : Brihat Stotra Ratnakar Shivadutta Shastri

Latest update : February 19, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 30, 2023

*sanskritdocuments.org*

# વિશ્વનાથાષ્ટકસ્તોત્રમ્

આદિશમ્ભુ-સ્વરૂપ-મુનિવર-ચન્દ્રશીશ-જટાધરં
મુણ્ડમાલ-વિશાલલોચન-વાહનં વૃષભધ્વજમ્ ।
નાગચન્દ્ર-ત્રિશૂલડમરૂ ભસ્મ-અઙ્ગવિભૂષણં
શ્રીનીલકણ્ઠ-હિમાદ્રિજલધર-વિશ્વનાથવિશ્વેશ્વરમ્ ॥ ૧॥

ગઙ્ગસઙ્ગ-ઉમાઙ્ગવામે-કામદેવ-સુસેવિતં
નાદબિન્દુજ-યોગસાધન-પઞ્ચવક્ત્રત્રિલોચનમ્ ।
ઇન્દુ-બિન્દુવિરાજ-શશિધર-શઙ્કરં સુરવન્દિતં
શ્રીનીલકણ્ઠ-હિમાદ્રિજલધર-વિશ્વનાથવિશ્વેશ્વરમ્ ॥ ૨॥

જ્યોતિલિઙ્ગ-સ્ફુલિઙ્ગફણિમણિ-દિવ્યદેવસુસેવિતં
માલતીસુર -પુષ્પમાલા -કઞ્જ-ધૂપ-નિવેદિતમ્ ।
અનલકુમ્ભ-સુકુમ્ભઝલકત-કલશકઞ્ચનશોભિતં
શ્રીનીલકણ્ઠહિમાદ્રિજલધર-વિશ્વનાથવિશ્વેશ્વરમ્ ॥ ૩॥

મુકુટક્રીટ-સુકનકકુણ્ડલરઞ્જિતં મુનિમણ્ડિતં
હારમુક્તા-કનકસૂત્રિત-સુન્દરં સુવિશેષિતમ્ ।
ગન્ધમાદન-શૈલ-આસન-દિવ્યજ્યોતિપ્રકાશનં
શ્રીનીલકણ્ઠ-હિમાદ્રિજલધર-વિશ્વનાથ-વિશ્વેશ્વરમ્ ॥ ૪॥

મેઘડમ્બરછત્રધારણ-ચરણકમલ-વિલાસિતં
પુષ્પરથ-પરમદનમૂરતિ-ગૌરિસઙ્ગસદાશિવમ્ ।
ક્ષેત્રપાલ-કપાલ-ભૈરવ-કુસુમ-નવગ્રહભૂષિતં
શ્રીનીલકણ્ઠ-હિમાદ્રિજલધર-વિશ્વનાથ-વિશ્વેશ્વરમ્ ॥ ૫॥

ત્રિપુરદૈત્ય-વિનાશકારક-શઙ્કરં ફલદાયકં
રાવણાદ્દશકમલમસ્તક-પૂજિતં વરદાયકમ્ ।
કોટિમન્મથમથન-વિષધર-હારભૂષણ-ભૂષિતં
શ્રીનીલકણ્ઠ-હિમાદ્રિજલધર-વિશ્વનાથવિશ્વેશ્વરમ્ ॥ ૬॥

મથિતજલધિજ-શેષવિગલિત-કાલકૂટવિશોષણં
    જ્યોતિવિગલિતદીપનયન-ત્રિનેત્રશમ્ભુ-સુરેશ્વરમ્ ।
મહાદેવસુદેવ-સુરપતિસેવ્ય-દેવવિશ્વમ્ભરં
    શ્રીનીલકણ્ઠ-હિમાદ્રિજલધર-વિશ્વનાથવિશ્વેશ્વરમ્ ॥ ૭॥

રુદ્રરૂપભયઙ્કરં કૃતભૂરિપાન-હલાહલં
    ગગનવેધિત-વિશ્વમૂલ-ત્રિશૂલકરધર-શઙ્કરમ્ ।
કામકુઞ્જર-માનમર્દન-મહાકાલ-વિશ્વેશ્વરં
    શ્રીનીલકણ્ઠ-હિમાદ્રિજલધર-વિશ્વેનાથવિશ્વેશ્વરમ્ ॥ ૮॥

ઋતુવસન્તવિલાસ-ચહુઁદિશિ દીપ્યતે ફલદાયકં
    દિવ્યકાશિકધામવાસી-મનુજમઙ્ગલદાયકમ્ ।
અમ્બિકાતટ-વૈદ્યનાથં શૈલશિખરમહેશ્વરં
    શ્રીનીલકણ્ઠ-હિમાદ્રિજલધર-વિશ્વનાથવિશ્વેશ્વરમ્ ॥ ૯॥

શિવસ્તોત્ર-પ્રતિદિન-ધ્યાનધર-આનન્દમય-પ્રતિપાદિતં
    ધન-ધાન્ય-સમ્પતિ-ગૃહવિલાસિત-વિશ્વનાથ-પ્રસાદજમ્ ।
હર-ધામ-ચિરગણ-સઙ્ગશોભિત-ભક્તવર-પ્રિયમણ્ડિતં
    આનન્દવન-આનન્દછવિ-આનન્દ-કન્દ-વિભૂષિતમ્ ॥ ૧૦॥

ઇતિ શ્રીશિવદત્તમિશ્રશાસ્ત્રિસંસ્કૃતં વિશ્વનાથાષ્ટકસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Vishvanathashtakastotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*